श्रीः

विद्याधरनीतिरत्नम्



१०.२३
२

विद्याधरः

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
पुस्तकालय

विषय संख्या 20.23
पुस्तक संख्या 2
आगत पञ्जिका संख्या 36,663

पुस्तक पर सर्व प्रकार की निशानियां
वर्जित है । कृपया १५ दिन से अधिक
पुस्तक अपने पास न रखें ।

चस्पति
य गुरुकुल कांगड़ी
सप्रेम भेंट

गुरुकुल कांगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि
न लगायें ।

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या..... आगत संख्या.....

पुस्तक-विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा ५० पैसे प्रति दिन के हिसाब से विलम्ब-दण्ड लगेगा।

चूरू (बीकानेर)

१९५८


पुस्तक मिलने के पते

(१) भारत प्रकाशन मन्दिर—अलीगढ़

(२) श्री हरनाम संस्कृत विद्यालय—चूरू (राजस्थान)

(३) दिवाकर गिरिजाशङ्कर शर्मा—सरस्वती सदन
अलख सागर—बीकानेर

मूल्य ।=)



श्रीसरस्वत्यै नमः

पूर्व निवेदन

स्वाधीन भारत की नवस्फूर्ति के इस माङ्गलिक अवसर पर, संस्कृत संसार की ओर से इन कतिपय श्लोकों को पाठकों की सेवा में समर्पित करते हुये मैंने यथाशक्ति यह प्रयत्न किया है कि इनको साधारण से साधारण संस्कृत के अध्येता और संस्कृतानुप्राणित समस्त भारतीय भाषाओं के ज्ञाता भी अनायास में ही समझ सकें।

संस्कृत का नीति-शास्त्र विश्व में अद्वितीय है। जीवन की कोई भी ऐसी समस्या नहीं है जिसका उत्तर उसमें न दे दिया गया हो। मैंने यदि कुछ कहने का साहस किया है तो वह इसलिये ही किया है कि मैं इन सरल श्लोकों के द्वारा भारत और विश्व के ध्यान को—'विद्याधर नीतिरत्नम्' में वर्णित विषयों पर विशेष रूप से आकृष्ट करना चाहता हूं। मेरा विश्वास है कि इन विषयों पर यदि कुछ विशेष ध्यान दिया गया तो किसी न किसी अंश में विश्व का नैतिक उत्थान अवश्य होगा।

इन श्लोकों के परिष्करण में मुझे मेरे अनुज विद्यावागीश श्रीयुत डा० दशरथ शर्मा एम० ए०, डी० लिट्, कविरत्न श्रीयुत मान्य पं० यज्ञदत्त जो पुरोहित (अलीगढ़) एवं श्री पं० लक्ष्मीचन्द्र जी मिश्र से जो सहायता मिली है उसके लिये मैं हृदय से इन सब विद्वानों का आभारी हूँ।

शिवरात्री
सं० २०१४

विद्याधरः

विषय-सूची

विषया	पृष्ठे
(१) माङ्गलिकम्—	१
(२) प्रास्ताविकम् —	१
(३) आत्मविश्वासः—	१
(४) स्थिरमतिशक्तिः—	३
(५) आत्मगौरवम् (व्यक्तित्वम्) —	४
(६) अहम्मान परिहारः—	४
(७) अनित्या लोकवृत्तिः —	५
(८) कर्म महिमा—	७
(९) सद्गृहजीवनम्—	९
(१०) राष्ट्रजीवनम्	१०
(११) स्वार्थशोधनम्—	११
(१२) धन्यं स्त्रीजीवनम्—	१२
(१३) जीवनगतिः—	१३
(१४) भवजीवनसरणिः—	१४
(१५) अनाश्रितावृत्तिः—	१५
(१६) शठेशाठ्यं समाचरेत्—	१७
(१७) कृतार्थता—	१८
(१८) व्यर्थं किमर्थं विकलेन भाव्यम्--	२०
(१९) लोकशिक्षा—	२०
(२०) मानव जीवन वैचित्र्यम्—	२१
(२१) विश्वबन्धुत्वम्—	२३
(२२) नैराश्यविजयः—	२४
(२३) ध्रुवोऽवलम्बः—	२५
(२४) आत्मनिवेदनम्—	२७

पं० इन्द्र विद्यावाचस्पति स्मृति संग्रह

श्रीगणेशाय नमः

विद्याधर नीतिरत्नम्

माङ्गलिकम्

स्वयम्भवति यो नित्यं स्वयं यश्च समेधते
स्वयमेव प्रभुः सोऽयं कुर्यान्नः स्वावलम्बिनः ॥१॥

नित्यं मौनपरेऽपि यत्र मधुरा गीति र्जगन्मोहिनी
स्थाणोश्चापि विलक्षणं प्रतिपलं जागर्ति यन्नर्तनम् ।
सर्वे यत्र विरोधिनश्च जहति स्वीयान् विरुद्धान् गुणान्
सोऽयं कश्चन राजतां हृदि हृदि प्रेष्ठः प्रभुः शङ्करः ॥२॥

प्रास्ताविकम्

कवे कवय तत् काव्यं येन जीवनवल्लरी
नैराश्यहिमभग्नापि पुष्पिता फलिता भवेत् ॥३॥

आत्मविश्वासः

यत्राशा यत्र विश्वासः यत्रोत्साहः स्थिरामतिः
तत्र श्रीः सर्व सौख्यञ्च ध्रुवा नीति र्मतिर्मम ॥४॥

यस्य स्वात्मनि विश्वास स्तेन साध्यं न किम् भुवि
आत्मैव सर्वशक्तीनाम् गुणानाम् प्रभवः स्वयम् ॥५॥

यस्य तस्मिन्न विश्वासः तदाज्ञां न शृणोति यः
संशयोद्भ्रान्तचित्तः स भ्रान्तिमेवाधिगच्छति ॥६॥

साहसञ्च समुत्साहं न श्रान्तोऽपि जहाति चेत्
मार्गं नूनमवाप्नोति भ्रान्तोऽरण्येऽपि दुर्गमे ॥७॥

अनन्ते के वयं क्षुद्रा नैवं चिन्त्यं कदाचन
कणस्य पर्वतस्यापि स्थितिस्तस्मिन् यतः समा ॥८॥

निर्धनो निर्बलो वापि मानवः सन्ततं महान्
मानवै र्मानवै र्भाव्यम् मानुष्यं हि परा गतिः ॥९॥

किं धनं किम् बलं लोके का वा राजादिसत्क्रिया
नैतिकं बलमाधेयम् यद्धि सर्वार्थसाधकम् ॥१०॥

हीनोऽहं हन्त दीनोऽहम् व्यामोहं त्यज सत्वरम्
नाकाशो रजसाक्रान्तो चिरं म्लानोहि तिष्ठति ॥११॥

प्रसुप्तं नाम यत् किञ्चित् ज्योतिस्तेन्त विराजते
कुरु यत्नेन तद् बुद्धम् लोको बुद्धो भविष्यति ॥१२॥

"ध्रुवं कर्त्तुं समर्थोऽहं सर्व सर्वत्र सर्वदा"
एषा सुभावना रक्ष्या व्यक्तिभिः सन्ततं दृढा ॥१३॥

——*——

स्थिरमतिशक्तिः

असिद्धेष्वपि कार्येषु कम्पिता यस्य नो मतिः
तस्य तान्यपि सिध्यन्ति परस्मिन्नह्नि नाद्यचेत् ॥१४॥

अमुक्त धैर्या दृढनिश्चयाश्च
ध्रुवं स्वसाध्ये जयिनो भवन्ति ।
उत्साह सङ्कल्प बलोर्जितानाम्
स्वयं सहाया प्रकृतिः स्वभावात् ॥१५॥

बुद्धं न यावद् भवतीह तावत्
सर्वं विशालं भुवने विभाति ।
ज्ञातञ्च हस्तामलकं जनानाम्
आब्रह्म सर्वं भवति क्षणेन ॥१६॥

व्यक्तित्वम् (आत्मगौरवम्)

येन सर्वे प्रसन्नाः स्यु र्येन सर्वञ्च भासताम्
चन्द्र सूर्य समं रक्ष्यं व्यक्तित्वं तादृशम् जनैः ॥१७॥

व्यक्तित्वञ्चद् विनश्येत स्वसत्ता तस्य नश्यति
व्यक्तित्वं स्वप्रभावेण स्वयं लोके विभासते ॥१८॥

आत्मैव ह्यात्मनो बन्धुः सर्वमन्यत् परं स्मृतम्
प्रबोधय निजात्मानं व्यक्तित्वञ्चेदभीप्ससे ॥१९॥

विधेहि व्यापकञ्चैनम् तथा सर्वहिते रतम्
यथा त्वय्येव पश्यन्ति सर्वे स्वात्मानमाहृतम् ॥२०॥

यश्चिन्तयति यो वेति चेष्टते यश्च सन्ततम्
प्रभुरेव विभुः सोऽयं स्थितो नित्यं तवात्मनि ॥२१॥

———※———

अहम्मानपरिहारः

व्यक्तित्वे चाभिमाने च वर्तते महदन्तरम्
अहं गर्वः परित्याज्यो व्यक्तित्वाकांक्षिभिस्ततः ॥२२॥

प्रभुणा निहितं लोके वैशिष्ट्यं यत् कणे-कणे
अहम्मानेन धीमद्भि र्न हेयं तस्य दर्शनम् ॥२३॥

अज्ञा अपि तिरस्कार्या न विज्ञै र्ज्ञानगर्वितैः
सन्ति तेष्वपि तत्त्वानि यानि ज्ञेयानि पण्डितैः ॥२४॥

विद्वांसः संशयात्मानो मूर्खाश्च दृढनिश्चयाः
मतमेकं हि मूर्खाणां विदुषाञ्च सहस्रशः ॥२५॥

प्रकृत्या प्राकृताः शुद्धाः सत्याचार परायणाः
वञ्चकै र्भ्राम्यमाणास्ते रक्ष्याः सद्भिः प्रयत्नतः ॥२६॥

यस्तु स्वभावो नियतो हि यस्य
स तस्य कश्चित् सहजो हि धर्मः ।
तम्पालयन् सन् न स निन्दनीयः
कदापि सूते न तमः प्रकाशम् ॥२७॥

——※——

अनित्या लोकवृत्तिः

कथङ्कारमहो कश्चित् लोकमाराधयेदिमम्
चलस्यास्य चला वृत्तिः रुचिश्चास्य पृथक् पृथक् ॥२८॥

स्तवनं निन्दनञ्चैव लोकानां सहजो गुणः
स्तूयते निन्द्यते किं तै रेतन्नाद्यापि निश्चितम् ॥२९॥

स्पष्टं वद सदा स्पष्टं सत्यं निर्भीक चेतसा
श्रूयते नाद्य येनैतत् तेन श्वः श्रोष्यते ध्रुवम् ॥३०॥

को जानाति कदा किं किं श्रूयते चेह दृश्यते
जीवनं रचितं धात्रा श्रोतुं द्रष्टुं नवं नवम् ॥३१॥

यस्मिन् क्षणे तु यद् दृष्टम् प्रमाणं तद्धि तत्क्षणे
परक्षणेऽनुभूतानां नानुभूतिस्तथा पुनः ॥३२॥

किमेभिः कथ्यते किन्तैः कथ्येत इति शङ्किताः
वेपन्ते कातरा नित्यं साहसी लभते श्रियम् ॥३३॥

कथं गदेयं नहिं सत्यमेतत्
सत्यं तदेवेति मृषैव तद् वा ।
उदारभावेन विलोक्यमाने
स्वस्वक्षणे सत्यमिहास्ति सर्वम् ॥३४॥

"एवम् कृतं तैरिदमद्य विज्ञैः"
"समर्थ्यते तैरिदमेव चाद्य"।
प्रमाणभूतं न तदस्ति सर्वम्
लोकस्य काचित् नियता न वृत्तिः ॥३५॥

जाते विरुद्धे सकलेऽपि लोके
मार्गं मनस्वी न निजं जहाति।
सत्यं न जेतुं क्षमते हि कश्चित्
सीमा न काचिच्च बलस्य तस्य ॥३६॥

——*——

कर्म महिमा

कर्मक्षेत्रे विशालेऽस्मिन्नखिलं कर्मसम्भवम्
तस्मात् कमव संसाध्यं कर्मयोगाश्रितै र्जनैः ॥३७॥

मा वदी र्वचनं दीनं "कर्तुं मेतन्न शक्यते"
त्वंहि धाता विधाताच शक्यं कर्तुं न किन्त्वया ॥३८॥

उत्तिष्ठोत्तिष्ठ भो मित्र शङ्कां त्यज भयं तथा
अकम्पिते हि सङ्कल्पे लभ्यं लोके न किं त्वया ॥३९॥

भाग्ये यल्लिखितं तत् स्यात् सखे जाने न किं कदा
शक्यते यत् त्वया कर्त्तुम् साम्प्रतं त्वं कुरुष्व तत् ॥४०॥

चिन्तितं साधयेद् धीमान् उद्यमै; कार्य साधकैः
यद् भाव्यं तद् भवत्येव तत्र चिन्तानु कीदृशी ॥४१॥

अव्यग्रेण सदा स्थेयम् चिन्त्यं साध्यं पुनः पुनः
सुनिश्चितेऽपि कर्तव्ये दैर्ध्यं दुर्मति लक्षणम् ॥४२॥

क्षणं वसेत् कोऽपि निरुद्यमोन
न चापि सर्वत्र भवेत् त्वरावान् ।
नान्तो हि लोके यदि कर्मणां नः
कालेऽपि कालस्य न कश्चनान्तः ॥४३॥

कालस्यकालो न दिशांदिशावा केनापिदृष्टा न पुनर्निरीक्ष्या
नित्यं चले किन्तु जगत्प्रवाहे लक्ष्यं चलन्तेव समभ्युपैति ॥४४॥

मन्ये न नित्यं जगतीह किञ्चित्
क्षणं विभासेत च कीर्ति कान्तिः ।
अस्त्येव तत् किन्तु यदस्ति हस्ते
तदेव साध्यं विधिना बुधेन ॥४५॥

प्रतिक्षणं कालमुखे विशद्भिः सद्यो विधेयं भुवि यद् विधेयम्
गतस्य कालस्य कला व्यतीता याताः पुनर्नैव वशं कदाचित् ॥४६॥

---*---

सद्गृहजीवनम्

गृहं तदेतद् भवतीह धन्यम्
धन्याश्च धर्माः खलु तस्य सर्वे।
यत्र स्वरैक्यं सदृशी प्रवृत्तिः
सर्वेऽपि यस्मिंश्च मिथः सहायाः ॥४७॥

विहाय धर्मं गृहमेधिनां नः स ऐक्यभावः क्वपरत्र लभ्यः
एकस्य दुःखेन हि दुःखमग्नाः सुखेन सर्वे सुखिनश्च यस्मिन् ॥४८॥

गृहस्थ – धर्मेण समो हि धर्मो
नान्योहि कश्चिद् भुवि मानवानाम्।
मूलं स भुक्तेरथ सर्वमुक्तेः
सर्गस्य सर्वस्य च सारसन्धिः ॥४९॥

नैकेन केनापि जनेन शक्या वोढुं हि गुर्वी गृहभारगन्त्री
सहायका यत्र मिथश्च सर्वे स्वयं हि सा तत्र सुखेन याति ॥५०॥

सन्तान सम्पत्ति रमूल्यरत्नम्
सुसन्तति र्लोकहिताय लौके ।
सामाजिकीयं महती व्यवस्था
यत्नेन रक्ष्या च सुशिक्षणीया ॥५१॥

——*——

राष्ट्रजीवनम्

बुद्धिर्यस्मिन् बलं यस्मिन् यस्मिन् कोषस्य सद्व्ययः
राष्ट्रं तत्सर्वसम्पन्नम् भवेद् राष्ट्रशिरोमणि ॥५२॥

गुप्तं मन्त्रबलं यस्मित् यस्मिन् चारा विचक्षणाः
शासको जनबन्धुश्च राष्ट्रं तन्नावसीदति ॥५३॥

राष्ट्रे यस्मिन् कलिर्दम्भः स्वार्थबुद्धिश्च जृम्भते
विश्वासो न मिथः कश्चित् पतनं तस्य निश्चितम् ॥५४॥

यस्मिन् दानं न त्यागः न वा योगः स्वकर्मसु
भोगलिप्सा-समाक्रान्ते राष्ट्रे तस्मिन् कुतो गतिः ॥५५॥

लोकसेवा विधातव्या राष्ट्रसेवानुवर्तिभिः
समष्टेः सेवनाद् व्यष्टिः स्वयं लोके निषेव्यते ॥५६॥

श्रेणीमोहः परित्याज्यो रक्ष्यं सत्यञ्च सर्वशः
एकस्मिन्नेव दले सर्वे जायन्ते न महाशयाः ॥५७॥

हंहो धूर्ताः परित्यज्य व्याजसेवां बकव्रताम्
विधेया कापि सा सेवा यया सर्वोदयो भवेत् ॥५८॥

यदा यदा भ्रातृविरोध वृद्धिः
तदा तदा भारतयुद्ध मेति ।
सद्भ्रातृभावे च विवर्धमाने
रामायणीयो विजयः सदैव ॥५९॥

——*——

स्वार्थशोधनम्

न्यूनान्न्यूनं सदा रक्ष्या भावनेयं दृढ़ा हृदि ।
"सिद्धे भवति मत्कार्ये सिद्धं तस्यापि तद् भवेत्" ॥६०॥

लोकान् प्रतार्याथ विमुष्य तेषाम्
धनं भविष्यामि सुखोपभोगी ।
स्वप्नेऽपि मा चिन्तय चित्त एवम्
सुखी न कश्चित् परभागहारी ॥६१॥

स्वार्थैक सिद्धौ निरते हि चित्ते
सर्वेऽपि दोषाः स्वयमुद्भवन्ति ।
परार्थरोधः कुपितश्च कश्चित्
स्वार्थं समूलं बहुधा विहन्ति ।।६२।।

रे रे मानव सावधान मनसा मित्र क्षणं श्रूयताम्
स्वार्थं साधयितुं परार्थहनने मातत्परो भूः क्वचित् ।
सिद्धिस्तस्य भवेन्नवेत्यनियतं स्यादेव चैतत्फलम्
लोकश्चेन्नितरामशान्तिपतित स्तस्यैव सेयं कृपा ।।६३।।

—*—

धन्यं स्त्रीजीवनम्

अहो धन्यं स्त्रिया जन्म स्नेहोत्सर्गदयामयम् ।
तितिक्षा-व्रत-सम्पन्नं नित्य सेवा-परायणम् ।।६४।।

रक्षकं कुलधर्माणां सर्वेषाम् पालने रतम्
तत्तद् यज्ञ तपो दान प्रभुभक्ति समुज्ज्वलम् ।।६५।।

यौवनं न सदा स्थायि रूपं पौष्यं हि सात्त्विकम्
भाव्यं स्त्रीभि विशालाभिः पूर्णाभि र्मातृगौरवैः ।।६६।।

ईर्ष्या कलह दम्भानाम् अहङ्कारस्य चेत्स्थलम्
तदेव सर्व दुःखानाम् मूलं हन्त विजायते ॥६७॥

——*——

जीवनगतिः

शिक्षाया रीतयो नाना प्रकृतेः शिक्षणालये
समेति सम्मुखं यद्यत् शिक्षा ग्राह्या ततस्ततः ॥६८॥

प्राप्यं न किंचिदेकान्तं क्वचिज्जीवनवर्त्मनि
साम्यवैषम्ययो र्योगे नित्यं तल्लभते गतिम् ॥६९॥

कालस्य गतयो भिन्ना भिन्नाः सन्ति स्वभावतः
अनन्तं जीवनं येषाम् सर्वं तैरनुभूयते ॥७०॥

दुःखञ्चेत्सौख्यमप्यस्मिन् जीवने सुलभं न किम्
सुखे दुःखे समा रक्ष्या धीरै र्धीरा मतिस्ततः ॥७१॥

तीव्रे शोक समुद्वेगे शून्यं सर्वं विलोक्यते
भावी किन्तु पटाक्षेपः तस्मिन् दृश्येऽपि नूतनः ॥७२॥

दुःखञ्चेदागतं किञ्चित् स्थाता तन्नु कियच्चिरम्
क्षणिकेऽस्मिन् भवे किंतत् शाश्वतं यत्तु तिष्ठति ॥७३॥

जीवने द्वन्द्व सम्पूर्णे सौख्येनैकेन मोदताम्
युगपन्नैव लभ्यानि तानि सर्वाणि संसृतौ ।।७४।।

——*——

भवजीवन सरणिः

स्वस्थे हि देहे हृदयम्प्रसन्नम्
बुद्धिः प्रसन्ना च सुखी सदात्मा ।
लोकस्थिती रम्यतमा विभाति
स्वास्थ्यस्य रक्षा प्रथमं विधेया ।।७५।।

क्षणं किञ्चिदिह ज्ञेयं क्षणं किञ्चिच्च खेलनम्
क्षणं हासो विकासश्च लयश्चाथ परक्षणे ।।७६।।

प्रेम्णा किन्तु क्षणाः सर्वे संजायन्ते सुधामयाः
पश्य सर्वं जगत् प्रेम्णा प्रेम्णा सर्वैश्च सद्वदेः ।।७७।।

महान् जगत्यां जठरानुयोगो
यस्योत्तरं नित्यमहो प्रदेयम् ।
ज्वाला न शान्ता जठरेषु यावत्
तावन्न काचित् सुलभेह शान्तिः ।।७८।।

देवाः सर्वेऽपि तृप्यन्ति सन्तृप्ते जठरानले
तृप्तस्य षड्रसैश्चैव रसाः सर्वे सुखावहाः ॥७९॥

पूर्णा स्वसंसृतिः कार्या हृष्टा पुष्टा रसान्विता
स्वयं शुष्का परेषां तां कथं सा पोषयिष्यति ॥८०॥

यद्यहं नास्मि संसारे सोऽपि नास्त्येव मन्मतौ
यत्राहं तत्र संसारः क्व संसारो मया बिना ॥८१॥

क्वचिद् विस्मृतिगर्तेऽस्मिन् मयि लीने ऽपि दुस्तरे
नूनं स्थास्यति संसारो न मे किन्तु परस्य सः ॥८२॥

मया दृष्टं भवे यद्यद् अनुभूतञ्च यद्यथा
तस्य मय्येव संस्थानम् सर्वेषां संसृतिः पृथक् ॥८३॥

——*——

अनाश्रितावृत्तिः

अर्थम्बिना सर्वमनर्थ शीलम्
सर्वैरुपार्ज्यः प्रथमं स तस्मात् ।
दुःसाधनै रेष न किन्तु काम्य;
धर्मं विनार्थो न धनं विषं तत् ॥८४॥

अर्थाश्रिता चापि गति र्जगत्याम्
तथा विधेया न यथा क्षणाय ।
तस्मात् पृथक् काचन नैति चिन्ता
पृथक् न काचित् सरणीच लक्ष्या ॥८५॥

धनेन हीनो नहि कोऽपि हीनः
बलेन हीनो नहि वा विहीनः ।
मानेन हीनो नर एव हीनो
निजात्मदीनः सततं कृशो यः ॥८६॥

प्रचण्ड मार्तण्ड कराभिदग्धः
छायां समाश्रित्य विहीनपर्णाम् ।
प्राणी यथा कंचन तोषमेति
तुष्येत्तथा स्वल्पमपीह लब्ध्वा ॥८७॥

अनाश्रिता वृत्तिरिहाप्यते चेत्
किमिष्यतां तत्परतोहि लोके ।
परस्य हुङ्कारभयै र्विदीर्णा
न जीविता नापि मृता भवेम ॥८८॥

मृतो मृतो नैव कदापि कश्चित्
जीवन्मृतः किन्तु मृतः सदैव ।
मृतः पुनर्जीवति जीवलोके
जीवन्मृतो जीवतु किन्तु कस्मात् ॥८९॥

शठेशाठ्यं समाचरेत्

शठे शाठ्यं हि सन्नीतिः शठे शाठ्यं समाचरेत्
शठे शाठ्यं न यः कुर्यात् स ज्ञेयः शठपोषकः ॥९०॥

अक्षम्येऽपि क्षमा पापं क्षम्य एवं क्षमा क्षमा
दण्डयो न दण्ड्यते यत्र तत्रादण्ड्योऽपि दण्ड्यते ॥९१॥

विशाले मानस क्षेत्रे द्योतमाना स्वभावतः
मातृरूपा क्षमाशक्ति र्निर्दयेषु न लभ्यते ॥९२॥

परार्थनाशाय मतेः प्रसारे
पैशुन्यवृत्तौ परगर्हणे च ।
खलं न कश्चित् प्रभवेद् विजेतुम्
प्रतारणे भावनिगूहने च ॥९३॥

नीचो न नीचोऽहमिति ब्रवीति
न नीचता किन्तु तिरोहिता स्यात्
गुप्तापि सा विस्फुटतीह काले
व्रणे यथा पूयमयो विकारः ॥९४॥

रे दम्भिन् किमु लोकवञ्चनरतो भ्रान्तान् विधत्सेजनान्
दम्भस्य स्थिरता क्षणाय सततं सत्यस्थितिः शाश्वती ।
सत्या लोकहिताय चेत्तव रतिः कीर्तिम्परां प्राप्स्यसि
नोचेत् निश्चितमेव तेऽपि पतनं पापस्य पातो ध्रुवः ॥९५॥

——*——

कृतार्थता

परार्थसिद्धौ निजकार्यसिद्धिः
सुखे परेषां निजसौख्यवृद्धिः ।
दृश्येत येनापि जनेन लोके
लभ्येत तेनैव कृतार्थतापि ॥९६॥

एतन्मदीयं नहि तत् त्वदीयम्
एषैव माया विबुधैरभाणि ।
तद्युष्मदस्मद् भ्रमरान् निवार्य
पारे सुखं याहि सखे भवाब्धे ॥९७॥

स्वार्थाय तत् तच्च परार्थहेतोः
मिथ्यैव भावो वत कोऽपि तेऽयम् ।
धात्रा यतः सर्वविधायकेन
विनिर्मितं सर्वजनाय सर्वम् ॥९८॥

स्वार्थेन पूर्णे मनुजेऽपि नित्यं
न स्वार्थमात्रैव निरीक्षणीया ।
तस्मिन् प्रसुप्ताः करुणाप्रवाहा
अपि प्रयत्नेन विभावनीयाः ॥९९॥

कस्यापि जन्तो र्यदि दीनहीनाम्
दशां विलोक्यापि दयादरिद्रः ।
द्रुतं द्रुतश्चेन्न तवान्तरात्मा
मनुष्यरूपं विजहीहि सद्यः ॥१००॥

कृत्यञ्चेत् कृतमत्र किञ्चन सखे तेनैव मा भूःकृती
सिद्धं यत्खलु तत्सदा परिमितं साध्यस्य नान्तः क्वचित् ।
नित्यं किञ्चन पावनं कुरु ततो नित्यञ्च नव्यम् पठेः
यात्रेयं जगतोऽतिदीर्घविषया नैष्कर्म्यमस्यां त्यजेः ॥१०१॥

दास्याम्येव ददामि चैव वचने वाचांजयः शाश्वतः
तस्माद्देहि सदैव मग्नमनसा यच्चापि देयं भवेत् ।
भूदानं समयस्य दानमथवा विद्याप्रदानम्परम्
एकां वा दृशमेव काञ्चनशुभां सद्भावरम्याम् प्रियाम् ॥१०२॥

——*——

व्यर्थं किमर्थं विकलेन भाव्यम्

येनैव सृष्टाऽनुपमा स्वसृष्टिः
स्वयं स तस्याः कुरुते सुरक्षाम्
स्वाभाविकीयं खलु तस्य वृत्तिः
व्यर्थं किमर्थं विकलेन भाव्यम् ॥१०३॥

——*——

लोकशिक्षा

रागद्वेषौ समुद्भूतौ नियम्यौ तत्क्षणं जनैः
शनैः शनैः प्रवृद्धौ तौ भवेतां भीषणौ पुनः ॥१०४॥

हे मित्र नित्यं चल सावधानम्
क्षणं न लोकः सहते प्रमादम्
शान्तेन चित्तेन विचिन्त्य तस्मात्
शनैः शनैरात्मपदं निधेयम् ॥१०५॥

विचिन्त्यते यत् क्रियते न यच्च
न तेन सिद्धि र्भवितेह काचित् ।
किञ्चित् करोत्येव जनश्च कुर्वन्
निधेहि तस्मात् स्वमनः क्रियायाम् ॥१०६॥

१०.२३
2
36,66

बचो विचार्यैव सदाभिधेयं न तत्प्रयोज्यं हि विना विवेकम्
तस्य प्रयोगे निपुणाः प्रवीण स्तदाकुलश्चाकुल एव लोके ॥१०७॥
अभीप्ससे चेन्नियतं सुखंत्वं तथा प्रयत्नं सततं विधेहि
यथा प्रसन्नं हृदयं स्वतः स्यात् यथा च बुद्धिः स्वयमेव शुध्येत्
॥१०८॥

रत्नं भवे भवति यत् यदि तस्य मूल्यम्
लोकैर्न बुद्धमिह मोह परैः कथञ्चित् ।
कल्पे गतेऽपि नियतं भविता प्रदीप्तम्
तस्याभिभूतिरपि चेह भवेद् विशुद्धयै ॥१०९॥

साफल्ये यदि मोदसे विफलतावाप्तौ कुतः खिद्यसि
सिद्धे द्वे विधिनिर्मिते भगवती संसिद्ध्यसिद्धयात्मिके ।
साफल्येऽपि पराभवः परमहो नित्यं स्थितः सम्वृतः
वैफल्ये च तथैव कश्चन जयो विज्ञैः स्मृतौ तौ समौ ॥११०॥

——*——

मानवजीवनवैचित्र्यम् :

अहो विचित्रा मनुजस्य वृत्तिः
क्षणे विशाला कृपणा क्षणेन ।
ब्रह्मस्वरूपा प्रथम क्षणे चेत्
कीटेन हीनापि परक्षणे सा ॥१११॥

पं० इन्द्र विद्यावाचस्पति स्मृति संग्रह

क्षणैर्मितं जीवनमस्ति सर्वम्
मिति र्न काचिच्च भवे कृतीनाम् ।
किमत्र चित्रं जगति प्रकृत्या
तृष्णावतारो यदि मानवः स्यात् ॥११२॥

कारुण्यपूर्णः परररक्षणाय
कामं स्वदेहं विनिपातयेद्यः ।
स्वार्थाय सर्वान् विनिहन्तुमिच्छुः
स एव सद्यो भवतीति चित्रम् ॥११३॥

किं किं न दुःखं न जनो जनाय
ददाति लोके स्वसुखाय हन्त ।
अद्यापि दृष्टो नहि किन्तु कश्चित्
पूर्णेन सौख्येन भुवि प्रपूर्णः ॥११४॥

अहिंसनं मानव-जन्मसारः
हिंसापि किन्तु प्रकृतावपेक्ष्या
क्वचित्तयैवेह भवत्यहिंसा
कालानुकूलो मनुजस्य धर्मः ॥११५॥

सर्वोऽपि लोको नरकेन्द्रवर्ती
न तस्य सत्ता पृथगस्ति तस्मात् ।
तथापि तच्चापि विमर्द्य मूढो
निजात्महत्या निरतो नरोऽसौ ११६॥

क्षमोऽत्र कः कञ्चन शिक्षितुं किम्
पूर्णोह नैजा ननु कस्य शिक्षा ।
अहंमतिः किन्तु जनं विचित्रा
विज्ञं परस्माद् बहुधा विधत्ते ॥११७॥

अहो व्यतीतो नु कियान्न कालः
प्रशिक्ष्यमाणस्य जनस्य लोके ।
भ्रमन्सदा भ्रान्तमति र्जगत्याम्
अद्यापि किं किन्तु स वेत्ति सत्यम् ॥११८॥

प्राचीनतायाञ्च नवीनतायाम्
भेदो न कश्चित्परमार्थतोऽस्ति
तथापि दृष्टि र्मनुजस्य नित्यम्
विगाहते नव्यमियं स्वभावात् ॥११९॥

---*---

विश्ववन्धुत्वम्

नायं जनः स्वदेशस्य सजातीयश्च नैषमे
अज्ञानां भावना ह्येषा वयं विश्वस्य वान्धवाः ॥१२०॥
न को देशः स्वदेशोनः वान्धवा न च के भवे
मर्त्या एव वयं सर्वे मातास्माकञ्च भूरियम् ॥१२१॥

अपरं मन्यसे यं त्वं न परः स परः सखा
प्रेमार्द्रा यदि दृष्टिस्ते सर्वम् प्रेममयं जगत् ॥१२२॥

सौख्ये सर्वस्य नः सौख्यम् हिते लोकस्य नो हितम्
प्रियाः प्राणाहि सर्वेषाम् सर्वेऽपि प्राणिनो वयम् ॥१२३॥

परेषाम् पालनं यस्मात् चित्ते यस्माच्च सान्त्वना
धर्मः स एव सद्धर्मः प्रभुर्येन प्रसीदति ॥१२४॥

विश्वात्मा विश्वबुद्धयैव विश्वं पुष्णाति सन्ततम्
दृष्टिः क्षुद्रा ततो हेया विधेया विश्वहर्षिणी ॥१२५॥

अभेदे भेद बुद्धिः किम् ज्ञान दैन्येन तन्यते
सम्वदध्वं सदा सर्वैः सङ्गच्छध्वञ्च सर्वशः ॥१२६॥

——*——

नैराश्यविजयः

विकारमेष्यत्समवेक्ष्य चित्तम्
स्थेयं सतर्कैरिह नित्यमेव ।
उपेक्षितञ्चेत् प्रथमक्षणे तत्
भवेत्सुसाध्यम् न पुनः सुखेन ॥१२७॥

हठेन चित्ते तमसाभिभूते
प्रसन्नतायाञ्च विलोपितायाम् ।
खिन्नै निरीक्ष्या प्रकृति विशाला
मुहुर्विकारै विकृतापि हृष्टा ॥१२८॥

विघ्ने समागच्छति दीन चित्तैः
चिन्त्या न नित्यं निजहानिरेव ।
स जातु किञ्चिन्नवमर्थसिद्धे
विलक्षणं बीजमहो प्रकृत्याः ॥१२९॥

मृषैव मृत्योर्जन ! किं विभेषि
कालम्बिना केन समीपमेति ।
प्रतिक्षणं तस्य मुखे विशन्तः
के के न जीवन्ति रणाङ्गणेऽपि ॥१३०॥

को जानाति कदा नु कर्दमतलात् जायेत कः पङ्कजः
का वा दुर्दिनखिन्नमानसतलात् स्रोतस्विनी संस्फुरेत् ।
चित्रा सृष्टिनटी श्रयेत नितरां नानात्मिकां भूमिकाम्
यां यां यत्र दशांगतः पिब सखे तत्रैव तस्या रसम् ॥१३१॥

नैराश्यं कुरुते मतिं तव सखे यस्मिन् क्षणे कुण्ठिताम्
आह्लादस्य गतिं निरुध्य च यदा गाढं तमः सर्पति ।
रे नैराश्य पिशाच याहि परतो मत्पार्श्वतः सत्वरम्
इत्येवं सुसमाहितः स्थिरधिया तद्दूरतो निक्षिपेः ॥१३२॥

——*——

ध्रुवोऽवलम्बः

कृते यत्नेऽपि नैराश्यं मोहयत्येव चेन्मतिम्
आशायाः स्रोतसे तस्मै सर्वमर्घ्याजमर्प्यताम् ॥१३३॥

क्षुब्धे भवाब्धौ सततं स एकः
संरक्षकः सर्वसहायकश्च ।
तस्मात्परः कोऽपि न कर्णधारो
नचापि कश्चित् सुदृढ़श्च पोतः ॥१३४॥

मर्त्यैर्यथा यद् घटते जगत्याम्
दृष्टेऽपि मौनै र्विवशं तथा तत् ।
सदैव रक्ष्यः सुदृढोऽवलम्बः
सर्वाश्रयाणाम् परमाश्रयस्य ॥१३५॥

किं यासि बन्धो नतमस्तकस्त्वम्
चिन्ताभिभूतो विकलेन्द्रियश्च ।
संसारसिन्धौ तरणि विहारी
स्वयं क्वचिन्नेष्यति रम्यतीरम् ॥१३६॥

तदीयनाम्नि स्मृतिमेव याते
स्वतो न जाने कुत एति शान्तिः ।
प्रयाति भीतिः प्रपलाय्य सर्वा
विभाति भव्या परिवृश्च सृष्टिः ॥१३७॥

रे चित्त किं भ्रमसि चञ्चल तेषुतेषु
नानाविधेषु विषयेषु मृषैव नित्यम् ।
एकेन तेन कुरुषे नहिं किं रतिं ते
यम्प्राप्य नव्यं किमपीह नाप्यम् ॥१३८॥

आत्मनिवेदनम्

एकश्चापि पदश्चेन्मे सम्विशेत् हृदि कस्यचित्
कृतार्थं तद्भवेन्नूनम् चित्ते सर्वम् प्रतिष्ठितम् ॥१३९॥

अधीत्य यत्तच्च निशम्य लोकात्
स्वयश्च तत्तत्सुविचिन्त्य किञ्चित् ।
निवेदितं यत् किमपीह विज्ञाः
कार्यं कृतार्थं कृतिभिस्तदेव ॥१४०॥

नैराश्याक्रान्तचित्ते भवजलधि परिभ्रान्तपोत प्रतीके
मर्त्ये नित्यं नवाशा नवबल निकर-स्वात्मसामर्थ्यभर्त्री ।
लब्धा देव्याः प्रसादात् चरणकमलयोरर्पिता मातृदेव्या
लोकानां सत्ववृद्धयै भवतु कृतिरियं कापि विद्याधरस्य ॥१४१॥

जयगंज
अलीगढ़ ।

निवेदक—
विद्याधरः

पं० इन्द्र विद्यावाचस्पति स्मृति संग्रह

——*——

...दी विश्वविद्यालय

* श्री *

हरनामामृतम्

Harnamamritam

(Modern Sanskrit Poetry)

रचयिता—विद्यावाचस्पति श्री विद्याधर शास्त्री एम० ए०

संस्कृत रत्नाकर, भारती, दिव्यज्योति, मधुरवाणी, ब्रह्म-विद्या, ज्योतिष्मती आदि संस्कृत के मान्यपत्रों और महाकवि श्री नित्यानन्द जी, म० म० श्री परमेश्वरानन्द जी, म० म० श्री विश्वेश्वरनाथ जी रेऊ, श्री डा० वी० राघवन महोदय, श्री डा० फतहसिंहजी M. A. डी लिट्, आचार्य श्री द्विजेन्द्रनाथजी, आचार्य श्री नरदेव जी प्रभृति संस्कृत के प्रख्यात विद्वानों द्वारा प्रशंसित, पद-पद पर अभिनव सूक्तियों से परिपूर्ण "हरनामा-मृतम्" आधुनिक संस्कृत साहित्य का वह रसमय काव्य है जिसके प्रसाद गुण गुम्फित १६ सर्ग भारत की अनुपम संस्कृत संस्कृति, प्राचीन विद्वानों के आदर्श संस्कृत जीवन और वर्तमान मानव समाज की दयनीय संकुचित प्रवृत्तियों के प्रभावोत्पादक चित्रण के साथ ना[illegible] कृतिक वर्णनों से सम्पन्न हैं।

10.23,2
37773

प्रत्येक संस्कृता[illegible] कि वह संस्कृत संस्कृति से अनुप्रा[illegible] इस काव्य से अपने पुस्तक संग्रह को समृद्ध अवश्य करें।

मूल्य केवल १) रु०

SAMPLE STOCK VERIFICATION
1988
VERIFIED BY

SAMPLE STOCK VERIFICATION
1988
VERIFIED BY

'विद्याधरनीतिरत्नम्' लेखक की अन्य कृतियें—

संस्कृतजीवनम्–हरनामामृतम्	(महाकाव्य)	१)
लीलालहरी	(स्तोत्र)	
कलिपलायनम्	(नाटकम्)	
पूर्णानिन्दम्	(नाटकम्)	
विक्रमाभ्युदयम्	(चम्पू)	
आनन्दमन्दाकिनी	(खण्डकाव्य)	
मत्तलहरी	(खण्डकाव्य)	
काव्यवाटिका	(प्रकीर्णकाव्य)	
सनातनधर्मदर्शन	(हिन्दी)	
मरुमाधुरी	(हिन्दी)	
संस्कृत संस्कृति विश्वसन्देश	(हिन्दी)	

विद्यालय के अन्य प्रकाशन

शतचण्डीयज्ञविधानम्	(देवीप्रसाद)	६।।)
गंगासिंहकल्पद्रुम	(देवीप्रसाद)	२)
यथार्थदर्शन	(विद्याधरः)	।।)

मंत्री—

हरनाम संस्कृत विद्यालय

जोंहरी सागर—चूरू

(राजस्थान)

मुद्रक—आदर्श प्रेस, अलीगढ़ ।